पलं, क्ली, (पलतीति। पल+अच्।) आमिषम्। कर्षचतुष्टयम्। इत्यमरः।३।३।२०१॥२।६।८६॥ तत्तु शास्त्रे तोलकचतुष्टयम्। वैद्यके अष्टतोलकम्। लौकिके साष्टरक्तिद्विमाषकतोलकत्रितयम्। तत्पर्य्यायः। मुष्टिः २ प्रकुञ्चः ३ चतुर्थिका ४ विल्वम् ५ षोड़शिकाम्रम् ६। इति वैद्यकपरिभाषा॥ यथा, तिथ्यादितत्त्वे।

"पलन्तु लौकिकैर्मानैः साष्टरक्तिद्विमाषकम्।
तोलकत्रितयं ज्ञेयं ज्योतिर्ज्ञैः स्मृतिसम्मतम्॥"

विघटिका। इति राजनिर्घण्टः॥ सा तु घटिकाषष्टिभागैकभागः। षष्टिविपलञ्च। पलदण्डयोः प्रमाणन्तु।

"दशगुर्व्वक्षरोच्चारकालः प्राणः षड़ात्मकैः।
तैः पलं स्यात्तु तत्षष्ट्या दण्ड इत्यभिधीयते॥"

तेन च।

"मा कान्ते पक्षस्यान्ते पर्य्याकाशे देशे स्वाप्सीः
कान्तं वक्त्रं वृत्तं पूर्णं चन्द्रं मत्वा रात्रौ चेत्।
क्षुत्क्षामः प्राटंश्चेत्तत्रैतो राहुः क्रूरः प्राद्यात्तस्माद्ध्वान्ते हर्म्म्यस्यान्ते शय्याकान्ते कर्त्तव्या॥"

अस्यैकपाठात् पलं षष्टिपाठाद्दण्डः। इति ज्योतिस्तत्त्वम्॥

पलः, पुं, (पलतीति। पल+अच्।) पलालः। इति हेमचन्द्रः।४।२४८॥ (यथा, महाभारते।३।२३३।११।

"चण्डाश्च शौण्डाश्च महाशनाश्च
चौराश्च दुष्टाश्च पलाश्च वर्ज्ज्याः॥")

पलक्या, स्त्री, (पलकं मांसं तद्वृद्धये हितम्। पलक+यत्। स्त्रियां टाप्।) पालङ्गशाकः। इति राजनिर्घण्टः॥

पलगण्डः, पुं, (पलं मांसं तद्वत् गण्डति भित्तौ मृदादिना लिम्पतीति। गण्ड+अच्।) लेपकः। इत्यमरः।२।१०।६॥ राज इति भाषा॥

पलङ्कटः, त्रि, (पलं मांसं कटति आकुञ्चितं करोतीति। पल+कट+बाहुलकात् खच् मुम् च।) भयशीलः। भीरुः। इति त्रिकाण्डशेषः॥

पलङ्करः, पुं, (पलं मांसं करोतीति। पल+कृ+अच्। "तत्पुरुषे कृतीति।" ६।३।१४। इति द्वितीयायाः अलुक्।) पित्तम्। इति त्रिकाण्डशेषः॥

पलङ्कषः, पुं, (पलं कषतीति। कष हिंसायाम्+अच्। "तत्पुरुषे कृतीति।" ६।३।१४। इति द्वितीयाया अलुक्।) राक्षसः। इति मेदिनी। षे, ५३॥ कणगुग्गुलुः। इति राजनिर्घण्टः॥

पलङ्कषा, स्त्री, (पलङ्कष्+टाप्।) गोक्षुरकः। रास्ना। गुग्गुलुः। किंशुकः। मुण्डीरी। लाक्षा। इति मेदिनी॥ क्षुद्रगोक्षुरकः। महाश्रावणी। (यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये।

"अजार्य्याश्चर्म्मरोमाणि वचाकुष्ठं पलङ्कषा॥")

मक्षिका। इति राजनिर्घण्टः॥

पलप्रियः, पुं, (पलमामिषं प्रियं यस्य।) द्रोणकाकः। इति राजनिर्घण्टः॥ मांसाशिनि, त्रि॥

पलभा, स्त्री, (पलस्य भा छवियंत्र।) मेषसंक्रमणादर्व्वाक् सपादाष्टदिने मध्याह्ने द्वादशाङ्गुलशङ्कुजा छाया। तत्पर्य्यायः। पलविभा २ विषुवत्प्रभा ३। यथा, ग्रहलाघवे।

"मेषादिगे सायनभागसूर्य्ये
दिनार्द्धजा भा पलभा भवेत् सा॥"

पलभयोद्भूतचरखण्डकैः क्रमोत्क्रमस्थैर्हीनान्वितैर्लङ्कोदयैः स्वदेशीयोदया भवन्ति। अन्यत्स्पष्टाधिकारेऽपि चरसंस्कृता ग्रहाः स्पष्टा भवन्तीति प्रयोजनम्॥ यथा, सिद्धान्तशिरोमणौ॥

"क्रियतुलाधरसंक्रमपूर्व्वतोऽयनलवोत्थदिनेर्विषुवद्दिनम्।
मकरकर्कटसंक्रमतोऽयनं द्युदलभा विषुवद्दिवसेऽक्षभा॥"

"एवं विषुवती छाया स्वदेशे या दिनार्द्धजा।
दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा॥"

इति सूर्य्यसिद्धान्तः॥

"अजतुलादिगतस्य रवेर्द्दिने
द्युदलभार्कमिताङ्गुलशङ्कुजा।
पलविभाय— ॥"

इति वृद्धवशिष्ठसिद्धान्तः॥

पललं, क्ली, (पलति पल्यतेऽनेन वा। पल गतौ+"वृषादिभ्यश्चित्।" उणां १।१०८। इति कलच्।) मांसम्। इत्यमरः।२।६।३३॥ (यथा, गारुड़े। १८१ अध्याये।

"मार्ज्जारपललं विष्ठा हरितालञ्च भावितम्।
छागमूत्रेण तल्लिप्तो मूषिको मूषिकान् हरेत्॥")

पङ्कम्। (यथा, गोः रामायणे।५।८७।२६।

'दीपपङ्कनिमग्नं त्वामयशःपललावृतम्।
सर्व्वथा मानुषो रामस्त्वामन्तमुपनेष्यति॥")

तिलचूर्णम्। इति मेदिनी। ले, १०४।

"पललं तिलकल्कं स्यात्तिलचूर्णञ्च पिष्टकः।
पललं मधुरं रुच्यं पित्तास्रबलपुष्टिदम्॥"

इति राजनिर्घण्टः॥

सैन्धवतिलचूर्णम्। तिलकुटा इति भाषा। यथा, वैद्यके।

"पललन्तु समाख्यातं सैन्धवं तिलपिष्टकम्।
पललं मलकृद्वृष्यं वातघ्नं कफपित्तकृत्॥
वृंहणं गुरु वृष्यञ्च स्निग्धं मूत्रनिवर्त्तकम्॥"

पललः, पुं, (पलतीति। पल गतौ+"वृषादिभ्यश्चित्।" उणां।१।१०८। इति कलच्। यद्वा, पलं मांसं लातीति। ला+कः।) राक्षसः। इति मेदिनी। ले, १०४॥

पललज्वरः, पुं, (पललस्य मांसस्य ज्वर इव।) पित्तम्। इति हारावली। १४१॥

पललाशयः, पुं, (पलले आशेते इति। आ+शीङ शयने+अच्।) गण्डरोगः। इति शब्दरत्नावली।

पलवः, पुं, (पलं पलायनं वाति हिनस्ति नाशयतीति। पल+वा ल गमनहिंसयोः+"आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) मत्स्यधारणोपायः। पोलो इति भाषा। तत्पर्य्यायः। प्लवः २ पञ्जराखेटः ३। इति त्रिकाण्डशेषः॥

पलाग्निः, पुं, (पलस्य मांसस्य अग्निः। मांसपाकशक्तिमत्तयास्य तथात्वम्।) पित्तम्। इति हारावली। १४१॥

पलाङ्गः, पुं, (पलं मांसं तत्प्रधानं अङ्गं यस्य।) शिशुमारः। इति हारावली। ७७॥

पलाण्डुः, पुं, (पलस्य मांसस्य अण्डमिवाचरतीति। "मृगय्वादयश्च।" उणां १।३८। इति कुप्रत्ययात् साधुः।) मूलविशेषः। पेयाज् इति भाषा। तत्पर्य्यायः। सुकन्दकः २। इत्यमरः।२।४।१४७॥ लोहितकन्दः ३। इति रत्नमाला॥ तीक्ष्णकन्दः ४ उष्णः ५ मुखदूषणः ६ शूद्रप्रियः ७ कृमिघ्नः ८ दीपनः ९ मुखगन्धकः १० बहुपत्रः ११ विश्वगन्धः १२ रोचनः १३ पलाण्डूः १४ सुकुन्दकः १५। इति शब्दरत्नावली॥ अस्य गुणाः। कटुत्वम्। बल्यत्वम्। कफपित्तवान्तिदोषनाशित्वम्। गुरुत्वम्। वृष्यत्वम्। रोचनत्वम्। स्निग्धत्वञ्च। इति राजनिर्घण्टः॥ यथा, भावप्रकाशे।

"पलाण्डुर्यवनेष्टश्च दुर्गन्धो मुखदूषकः।
पलाण्डुस्तु गुणैर्ज्ञेयो रसोनसदृशो गुणैः॥
स्वादुपाकरसोऽनुष्णः कफकृन्नातिपित्तलः।
हरते केवलं वातं बलवीर्य्यकरो गुरुः॥"

पलाण्डुभक्षणे दोषो यथा,—

"पलाण्डुं विड़्वराहञ्च छत्राकं ग्रामकुक्कुटम्।
लशुनं गृञ्जनञ्चैव जग्ध्वा चान्द्रायणञ्चरेत्॥"

इति प्रायश्चित्तविवेके याज्ञवल्क्यः॥

पलादः, पुं स्त्री, (पलं मांसमत्तीति। अद् भक्षणे+"कर्म्मण्यण्।" ३।२।१ इत्यण्।) राक्षसः। इति जटाधरः॥ (मांसभक्षके, त्रि॥)

पलादनः, पुं स्त्री, (पलं मांसमत्तीति। पल+अद्+ल्युः।) राक्षसः। इति हेमचन्द्रः॥ मांसभक्षणशीले, त्रि॥

पलान्नं, क्ली, (पलं मांसं तेन सह पक्वं अन्नम्। शाकपार्थिवादिवत् समासः।) मांसादियुक्तसिद्धभक्तम्। पोलाओ इति भाषा। तस्य पाकप्रकारो द्रव्याणि च यथा। छागमांसं १ शरावः। घृतं ।० शरावपादः। त्वचं ३ माषकम्। लवङ्गं ३ माषकम्। एला ३ माषकम्। तण्डुलं १ शरावः। मरिचं २ तोलकम्। तेजपत्रं २ तोलकम्। कुङ्कुमं १ माषकम्। आर्द्रकं २ तोलकम्। लवणं ६ तोलकम्। धन्याकं २ तोलकम्। द्राक्षा ⁄० शरावपादार्द्धम्। छागमांसं खण्डं धौतयित्वा शुष्कस्नेहपाककरणानन्तरं पात्रान्तरे तेजपत्रोपरि अल्पार्द्धगन्धद्रव्येण सह प्रथमं सज्जीकर्त्तव्यम्। ततस्तण्डुलं जलेनार्द्धसिद्धं कृत्वा मण्डगालनपूर्व्वकमल्पाल्पगन्धद्रव्येण सह तन्मांसोपरि सज्जीकर्त्तव्यम्। एवं प्रकारेण वारं वारं सज्जीकृत्य तदुपरि अवशिष्टघृत-